हिनः ॥ नान्तर्लोहितशल्याश्च तेषु सम्यग्विशोधनम् ॥ पांशुरोमनखादीनि चलमस्थि भवेच्च यत् । अहृतानि यतोऽमूनि पाचयेयुर्भृशं व्रणम् । रुजश्च विविधाः कुर्य्युस्तस्मादेतान्विशोधयेत् । ततोव्रणं समुन्नम्य स्थापयित्वा यथास्थितम् ॥ सीव्येत् सूक्ष्मेण सूत्रेण वल्केनाश्मन्तकस्य वा । शणजक्षौमसूत्राभ्यां स्नाय्वा बालेन वा पुनः । मूर्व्वागुडूचीतानैर्व्वा सीव्येद्वेल्लितकं शनैः ॥ सीव्येद्गोफणिकां वापि सीव्येद्वा तुन्नसेवनीम् । ऋजुग्रन्थिमथो वापि यथायोगमथापि वा ॥ देशेऽल्पमांसे सन्धौ च सूची वृत्ताङ्गुलद्वयम् । आयता त्र्यङ्गुला त्र्यस्रा मांसले वापि पूजिता ॥ धनुर्व्वक्रा हिता मर्मफलकोशोदरोपरि । इत्येतास्त्रिविधाः सूचीस्तीक्ष्णाग्राः सुसमाहिताः । कारयेन्मालतीपुष्पवृन्ताग्रपरिमण्डलाः । नातिदूरे निकृष्टे वा सूचीं कर्म्मणि पातयेत् । दूराद्रुजो व्रणौष्ठस्य सन्निकृष्टेऽवलुञ्चनम् । अथ क्षौमपिचुच्छन्नं सुस्यूतं प्रतिसारयेत् । प्रियङ्ग्वञ्जनयष्ट्याह्वलोध्रचूर्णैः समन्ततः । शल्लकीफलचूर्णैर्व्वा क्षौमध्यामेन वा पुनः । ततो व्रणं यथायोगं बद्ध्वाचारिकमादिशेत् । एतदष्टविधं कर्म समासेन प्रकीर्त्तितम्” ।

**अष्टश्रवण** पु० अष्टौ श्रवणान्यस्य । चतुर्मुखे ब्रह्मणि चतुर्मुखस्य प्रतिमुखं द्विकर्णत्वाच्च तथात्वम् अष्टश्रवआदयोऽप्यत्र ।

**अष्टाकपाल** त्रि० अष्टासु कपालेषु संस्कृतः अण् तस्य लुक् । “अष्टनः कपाले हविषि” वार्त्ति० आत् । अष्टसु कपालेषु संस्कृते पुरोडाशादौ “आग्नेयोऽष्टाकपालः पुरोडाशो भवति” । “अष्टाकपालाः मध्ये पुरोडाशा भवन्ति” इति च शत०ब्रा० ।

**अष्टाक्षर** त्रि० अष्टावक्षराणि यत्र पादे । १अष्टाक्षरयुक्तपादके अनुष्टुब्जातिके वर्णवृत्तभेदे । “अष्टाक्षरा वै गायत्री” श्रुतिः गायत्र्याःषडक्षरचतुष्पादत्वेऽपि अष्टाक्षरत्रिपादरूपत्वं सर्वत्र प्रसिद्धम् । २वक्त्रनामके मात्रावृत्तविशेषे विषमवृत्ते । “पञ्चमं लघु सर्व्वत्र सप्तमं द्विचतुर्थयोः । गुरु षष्ठञ्च पादानां शेषेष्वनियमोमतः । प्रयोगे प्रायिकं प्राहुः केऽप्येतद्वक्त्रलक्षणम् । लोकेऽनुष्टुबिति ख्यातम् तस्याष्टाक्षरता कृता” छन्दोम० ।

**अष्टाङ्ग** पु० अष्टावङ्गानि यस्य । यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिरूपे योगशास्त्रोक्ते १योगविशेषे “यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानीति पात० सू०” । यमोनियमश्चासनञ्च प्राणायामस्ततःपरम् । प्रत्याहारोधारणा च ध्यानं सार्द्धं समाधिना । अष्टाङ्गान्याहुरेतानि योगिनां योगसिद्धये इति” पुरा० । एतेषां लक्ष्म अष्टाङ्गयोगशब्दे वक्ष्यते । “जानुभ्याञ्च तथा पद्भ्यां पाणिभ्यामुरसा धिया । शिरसा वचसा दृष्ट्या प्रणामोऽष्टाङ्ग ईरित” इत्युक्तलक्षणे २प्रणामे “आपः क्षीरं कुशाग्रं च दधि सर्पिः सतण्डुलम् । यवः सिद्धार्थकश्चैव अष्टाङ्गोऽर्घः प्रकीर्त्तितः” इत्यष्टद्रव्यघटिते ३पूजोपकरणेऽर्घे, “आपः क्षीरं कुशाग्राणि घृतं मधु तथा दधि । रक्तानि करवीराणि तथा वै रक्तचन्दनम् अष्टाङ्ग एष वा अर्घो भानवे परिकीर्त्तितः” काशीख० उक्ते ४अष्टद्रव्यात्मके सूर्य्यार्घे ५शारीफलके च तस्य प्रत्येकपङ्क्तौ अष्टपदरूपाङ्कत्वात्तथात्वम् । “६शल्याद्यष्टाङ्गके आयुर्वेदे यथा “तद्यथा शल्यं शालाक्यं कायचिकित्सा भूतविद्या कौमारभृत्यमगदतन्त्रं रसायनतन्त्रं वाजीकरणतन्त्रमिति । अथास्य प्रत्यङ्गलक्षणसमासः । तत्र १शल्यं नाम विविधतृणकाष्ठपाषाणपांशुलोहलोष्टास्थिबालनखपूयास्रावान्तर्गर्भशल्योद्धरणार्थं यन्त्रशस्त्रक्षाराग्निप्रणिधानव्रणविनिश्चयार्थञ्च ॥ २शालाक्यं नाम ऊर्द्ध्वजत्रुगतानां रोगाणां श्रवणनयनवदनघ्राणादिसंश्रितानां व्याधीनामुपशमनार्थम् ॥ ३कायचिकित्सा नाम सर्व्वाङ्गसंसृतानां व्याधीनां ज्वरातीसाररक्तपित्तशोषोन्मादापस्मारकुष्ठमेहादीनामुपशमनार्थम् ॥ ४भूतविद्या नाम देवासुरगन्धर्व्वयक्षरक्षःपितृपिशाचनागग्रहाद्युपसृष्टचेतसां शान्तिकर्म्मबलिहरणादिग्रहोपशमनार्थम् ॥ ५कौमारभृत्यं नाम कुमारभरणधात्रीक्षीरदोषसंशोधनार्थं दुष्टस्तन्यग्रहसमुत्थानाञ्च व्याधीनामुपशमनार्थम् ॥ ६अगदतन्त्रं नाम सर्पकीटलूतावृश्चिकमूषिकादिदष्टविषव्यञ्जनार्थं विविधविषसंयोगविषोपहतोपशमनार्थम् ॥ ७रसायनतन्त्रं नाम वयःस्थापनमायुर्मेधाबलकरं रोगप्रहरणसमर्थञ्च ॥ ८वाजीकरणतन्त्रं नाम अल्पदुष्टविशुष्कक्षीणरेतसामाप्यायनप्रसादोपचयजननिमित्तं प्रहर्षजननार्थञ्च ॥ एवमसावायुर्वेदोऽष्टाङ्ग उपदिश्यते” सुश्रुतः ॥ कर्म० संज्ञात्वान्न द्विगुः । अष्टसु तत्तदङ्गेषु न० व०व० ।

**अष्टाङ्गधूप** पु० कर्म्म० “पलङ्कषा निम्बपत्रं वचा कुष्ठं हरीतकी । सर्षपाः सयवाः सर्पिर्धूपनं ज्वरनाशनम्” इति चक्रदत्तोक्ते ज्वरनाशने धूपभेदे ।